# आयुर्वेदः दर्शनप्रधानः

Dr. A. R. ANILKUMAR,
GUEST LECTURER IN VEDANTA,
SREE SANKARACHARYA UNIVERSITY OF SANSKRIT,
KALADY.

धिषणावन्तः विजानन्ति कृत्स्नाः सुखमेव परमः पुरुषार्थ इति। मोक्षापराभिधं सुखमाध्यात्मिकाधिभौतिकाधिदैविकत्रिविधदुःखहरमित्युद्घोषयन्ति शास्त्राणि सर्वाणि। मोक्षस्त्वनायासं कश्चिन्न लभेतेत्यतः तत्तच्छास्त्रप्रतिपादितसरणौ तत्तदधिकारिणां जिज्ञासूनां प्रयासः सुलभो न दृश्यते। आत्यन्तिकदुःखनिवृत्तये सत्यामपीच्छायां नैमिषिकसुखार्जनाय नश्वरशरीरमवलम्ब्य वर्तमाननैमिषिकदुःखोन्मूलनाय प्राणिनः प्रायः प्रवर्तन्ते।

'शरीरमाद्यं खलु धर्मसाधन'मिति कुमारसंभवोक्तिः शरीरसंरक्षणं प्रथमं तावत्करणीयमिति पाठयति। 'धर्मार्थकाममोक्षाणां शरीरं साधनं यतः। अतो रुग्भ्यस्तनुं रक्षेन्नरः कर्मविपाकवित्।।'[1] इति शाङ्र्गधरवचनं चतुर्विधपुरुषार्थप्राप्तये शरीरमावश्यकं, तत्तु संरक्षणीयमित्यत्र प्रमाणं भवति। शरीरसंरक्षणाय आयुर्वेदशास्त्रमवलम्बामहे

वयम्। शरीरसम्बन्धिनः दुःखस्य निदानभूताः रोगाः, रोगाणां निदानानि, रोगाणां हानम्, रोगहानाय भेषजं तथा तेषां प्रयोगः इत्येतेषां प्रपञ्चनं यस्मिन्शास्त्रे दृश्यते तदायुर्वेददर्शनम्। वेदोऽयमुपवेदः अथर्ववेदस्येति प्रथते। 'इह खल्वायुर्वेदं नामोपाङ्गमथर्ववेदस्य'[2] इति सुश्रुतसंहितासूत्रस्थाने सुश्रुताचार्यः आयुर्वेदस्य अथर्ववेदेन सहाङ्गाङ्गिभावं कण्ठतः निर्दिशति। आयुर्वेदः ऋग्वेदस्योपवेद इत्यभिप्रयन्ति केचन विद्वांसः।[3]

भारतवर्षे बहोः कालात्पूर्वमेव चिकित्साशास्त्रमासीत्। अतिप्राचीनेषु ऋग्यजुःसामाथर्वाख्येषु वेदेषु समुपलभ्यन्ते बहवश्चिकित्साशास्त्रविषयाः। त्रिचतुःसहस्रसंवत्सरेभ्यः पूर्वं कायचिकित्सा, शल्यतन्त्रशालाक्यतन्त्र-कौमारभृत्यागततन्त्रभूतविद्यारसायनतन्त्रवाजीकरणाख्यैः अष्टभिः प्रधानाङ्गैः प्रविभज्यायुर्वेदे सर्वेष्वङ्गेषु तन्त्राणि बहून्यारचितानि परमकारुणिकै-राप्ततमैर्मनीषिभिर्महर्षिभिः। दैवदुर्विपाकादस्माकं तन्त्राणीदानीं नाममात्रशेषाणि संवृत्तानि। कायचिकित्साप्रधानं चरकप्रतिसंस्कृतमग्निवेशतन्त्रम्, शल्यचिकित्सा-प्रधानं सुश्रुततन्त्रं चेति तन्त्रद्वयं सम्प्रत्युपलभ्यते सम्पूर्णम्।

चरकसंहिता, सुश्रुतसंहिता, हारीतसंहिता, शार्ङ्गधरसंहिता, भेलसंहिता, काश्यपसंहिता, माधवनिदानं, अष्टाङ्गहृदयमित्यादीनि ग्रन्थतल्लजान्यायुर्वेदीयानि विद्यन्ते।

आयुरस्मिन्विद्यतेत्यायुर्वेदः, आयुर्विद्यते ज्ञायतेऽनेनेत्यायुर्वेदः, आयुर्वेदयतीत्यायुर्वेदः, अनेन वाऽयुर्विन्दतीत्यायुर्वेदः, आयुर्विद्यते विचार्यतेऽनेन वेत्यायुर्वेदः।[4] 'हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्। मानं च तस्य यत्रोक्तमायुर्वेदः स उच्यते।।'[5] इति चरकः। आयुर्वेदस्य प्रयोजनं किमित्यत्र भगवान् सुश्रुतं प्रति वदति-'वत्स सुश्रुत इह खल्वायुर्वेदप्रयोजनं व्याध्युपसृष्टानां व्याधिपरिमोक्षः स्वस्थस्य रक्षणञ्चेति'।[6] अतः रोगचिकित्सा स्वास्थ्यरक्षणञ्च भवत्यायुर्वेदप्रयोजनम्।

भारतीयदर्शनानुसारं पाञ्चभौतिकं भवतीदं शरीरम्। तस्य शरीरस्य यथावत्संरक्षणमेवायुर्वेदस्य मुख्यं प्रयोजनम्। सांख्यानां सत्वरजस्तमसां साम्यावस्था प्रकृतिर्यथा तथा वातपित्तश्लेष्मणां साम्यावस्था एव शरीरस्य सुस्थितिः। यदैतेषां साम्यावस्थाभङ्गस्तदा रोगादयस्समुद्भवन्ति प्रकृतेर्महदादिवत्। पञ्चभूतेभ्यः समुद्भूतशरीरे विद्यमानामयानां निवारणं पञ्चभूतेभ्यः सङ्गृहीतवन्यौषधिभिरेव कार्यमिति लक्षयत्यायुर्वेदः।

चिकित्सायाः सन्ति पादाश्चत्वारः। तदुक्तं सुश्रुतेन सूत्रस्थाने-

वैद्यो व्याध्युपसृष्टश्च भेषजं परिचायकः
एते पादाश्चिकित्सायाः कर्मसाधनहेतवः।
गुणवद्भिः पादैश्चतुर्थो गुणवान्भिषक्
व्याधिमल्पेन कालेन महान्तमपि साधयेत्।।
वैद्यहीनास्त्रयः पादाः गुणवन्तोऽप्यपार्थकाः।

उद्गातृहोतृब्रह्माणो यथाध्वर्युं विनाध्वरे।।[7] इत्येतेषु श्लोकेषु चिकित्साविधाने वैद्यस्य प्राधान्यं कथितं वर्तते।

पाश्चात्यवैद्येभ्यः भारतीयायुर्वैद्यः भिन्नः भवति। भिषजः पदार्थविज्ञानशास्त्ररसायनशास्त्र-जीवशास्त्रशरीरशास्त्राणामेव ज्ञानमावश्यकमिति पाश्चात्यरीतिः। किन्तु चिकित्साविधाने आयुर्वेदवैद्यस्य न केवलमेतेषां ज्ञानमपि तु भारतीयदर्शनानां ज्ञानमावश्यकम्। आयुर्वेदसम्बद्धपदार्थविज्ञान-रसायनजीवनशरीरादिशास्त्रविषयाः तदनुरोधसिद्धान्ताश्च दर्शनानामाधारेणैव कथिताः। अतः दर्शनज्ञानं विना आयुर्वेदशास्त्राध्ययनं अपूर्णं भवति।

संसारदुःखनिवारणाय गौतमबुद्धः चतुर्विधसाधनान्युपदिशति-१. दुःखस्य स्वरूपं किम्? २. दुःखस्य कारणं किम्? ३. दुःखनिवारणाय किं कार्यम्? ४.

दुःखकारणोन्मूलनायोपयोगिनी चिकित्सा का? इत्यादिविषयान् विचिन्तयन् सर्वसन्देहनिवृत्तिपूर्वकं बुद्धः सूत्राणि व्यरचयत्। आयुर्वेदचिकित्सासम्प्रदायेऽपि चतुरः मार्गान् प्रधानतयानुसरन्ति। चिकित्सायां तु १. व्याधेर्लक्षणं किम्? २. व्याधिकारणानि कानि? ३. व्याधिनिवारणं कथं कार्यम्? ४. व्याधिकारणनिरोधः कथं कार्यः? इत्येतदनुचिन्तनं मुख्यं भवति। तृष्णैव बौद्धदर्शने सकलदुःखहेतुः। तृष्णायाः निरोधे दुःखानां निवृत्तिस्ततो निर्वाणप्राप्तिश्च भवति। आयुर्वेदशास्त्रानुसारमपि व्याधिकारणीभूतदोषनिर्मूलनमेव रोगनिवृत्तिः।

न केवलं दुःखकारणीभूततात्कालिकरोगनिवारणमायुर्वेदे लक्षितम्, अपि तु शाश्वतदुःखमरणभयनिर्मूलनसाधनरूपेण योगाभ्यासो निरूपितः। चिकित्सापद्धतिरियं सत्वावजयनाम्ना चरकसंहितायां सूत्रस्थाने प्रतिपादिता दृश्यते। सत्वावजयो नाम मनोनियन्त्रणम् अर्थादहितेभ्योऽर्थेभ्यो मनोनिग्रहः भवति। पातञ्जलयोगमुररीकृत्य चरकः शरीरस्थाने प्रथमाध्याये एवं वदति-

वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः।
केशलोमनखाग्रान्नमलद्रवगुणैर्विना।।

योगे मोक्षे च सर्वासां वेदनानामवर्तनम्।
मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रर्तकः।।

आत्मेन्द्रियमनोऽर्थानां सन्निकर्षात्प्रवर्तते।
सुखदुःखमनारम्भादात्मस्थे मनसि स्थिरे।।

निवर्तते तदुभयं वशित्वञ्चोपजायते।
सशरीरस्य योगज्ञाः तं योगमृषयो विदुः।।

आवेशश्चेतसो ज्ञानमर्थानां छन्दसः क्रिया।
दृष्टिः श्रोत्रं स्मृतिः कान्तिरिष्टतश्चाप्यदर्शनम्।।

इत्यष्टविधमाख्यातं योगिनां बलमैश्वरम्।
शुद्धसत्त्वसमाधानात्तत्सर्वमुपजायते।।
मोक्षो रजस्तमोऽभावात् बलवत्कर्मसंक्षयात्।
वियोगः सर्वसंयोगैरपुनर्भव उच्यते।।[8] चरकसंहितायां विद्यमानस्यास्य श्लोकभागस्य सम्यगवगमनं योगदर्शनज्ञानं विना न भवति। अपि च योगशास्त्रज्ञानं विना आयुर्वेदवैद्यस्य वैद्य इति कथनेऽप्यधिकारो नास्ति। आयुर्वेदचिकित्सासु अन्तःपरिमार्जनं बहिःपरिमार्जनं शास्त्रप्रणिधानमिति त्रैविध्यं दृश्यते तद्वद्धठयोगेऽपि तादृक्चिकित्सा त्रिविधा दृश्यते। आयुर्वेदे पञ्चकर्मविधाननाम्ना प्रख्यातमन्तःपरिमार्जनं हठयोगे षट्कर्मविधाननाम्ना प्रथते। 'सर्वेषामेव रोगाणां निधानं कुपिताः मलाः'[9] इत्यतः षट्कर्माचरणेन कुपितमलनिरूपणं कार्यम्। देहशुद्धिः, नाडीशुद्धिः, आन्तरशुद्धिश्च नित्यषट्कर्माभ्यासेन भवति।

मन्त्रशास्त्रसम्प्रदायोऽप्यायुर्वेदवैद्यानामावश्यकः। कुत इति चेच्चरकसुश्रुतादिग्रन्थेषु त्रिविधचिकित्सासु दैवव्यपाश्रयचिकित्सा एकास्ति। चरकसंहितायां सूत्रस्थाने एकादशाध्याये बलिमन्त्रादीनां चिकित्सोदाहृता दृश्यते। सुश्रुतसंहितायामपि ग्रहचिकित्सासु शस्त्रकर्मभ्यः केचन रक्षोमार्गः ज्ञापिताः। लोकसाधारणीभूतभक्तिमार्गोऽपि आयुर्वेदे स्वीकृतः। तेषां चिन्तने भक्तिः सकलदुःखनिवारकदिव्यौषधं भवति। अत एव चरकेण त्रिविधचिकित्सासु भक्तिरपि स्वीकृता दृश्यते।

सम्यक् भक्तिः, सम्यक् ज्ञानं, सम्यक् चरित्रमितिनाम्ना विख्यातं रत्नत्रयं यन्मोक्षमार्गत्वेन जैनदर्शने प्रतिपादितं तदायुर्वेदभिषजे अत्यन्तमावश्यकम्। सामान्यतया दर्शनेषु केवलभक्तिमार्गेण , केवलज्ञानमार्गेण, केवलकर्ममार्गेण वा मोक्षप्राप्तिर्भवतीत्युच्यते किन्तु जैनदर्शने मोक्षप्राप्त्यै भगवतां भक्तिः, वेदान्तिनां ज्ञानं, पूर्वमीमांसकानां कर्म च

रत्नत्रयेण प्रतिपद्यते। वैद्ये विश्वासः, औषधं, औषधसेवा इत्येतत्त्रयं विना रोगान्मुक्तिः न भवति; एतत्त्वायुर्वेदशास्त्रे रोगनिवारणायावश्यकं रत्नत्रयं भवति। रोगिणः केवलं वैद्ये विश्वासमात्रेण रोगोपशमनं न भवति किन्तु औषधसेवा, वैद्योक्तरीत्या आहारविहारेषु नियमोऽपि आवश्यकः भवति। विनैतद्विषयत्रयं रोगनिवृत्तिर्नास्ति, रत्नत्रयं विना जैनदर्शने मोक्षप्राप्तिर्न भवतीत्यनयोः दर्शनयोः साम्यता वर्तते।

विविधास्तिकनास्तिकदर्शनेभ्यः विशिष्य न्याययोगवेदान्तबौद्धजैनदर्शनेभ्यः आयुर्वेददर्शनानुकूलसिद्धान्तानां सङ्ग्रहणं कृतमित्यतस्तस्यायुर्वेदस्य दर्शनतात्त्विकसिद्धान्तात्पार्थक्यं कर्तुमशक्यम्। चिकित्साविधाने आयुर्वेदवैद्यानां भारतीयदर्शनज्ञानमत्यन्तमावश्यकम्। आयुर्वेदचिकित्सासम्प्रदायस्य प्राधान्यमुत्तरोत्तरं द्रढीकर्तुं दर्शनानां स्वाधीनं योगदानञ्चाभिज्ञैश्चिकित्सातत्त्वविद्भिर्विदितमत इदानीं आङ्गलेयवैद्यसम्प्रदायेऽपि भारतीयदर्शनन्यस्तसिद्धान्तस्वीकारः पाश्चात्यायुर्विज्ञानपटुभिः क्रियते।

**पादटिप्पणी**

१. शाङ्र्गधरसंहिता, पञ्चमोऽध्यायः, श्लोकः-५५।

२. सुश्रुतसंहितासूत्रस्थानम्, वेदोत्पत्तिनामा प्रथमाध्यायः, श्लोकः-६।

३. संस्कृतसाहित्येतिहासः (संस्कृतवाङ्मयस्य समग्रोऽभिलेखः), आचार्यः लोकमणिदाहालः, पृष्ठः-३३।

४. सुश्रुतसंहितासूत्रस्थानम्, वेदोत्पत्तिनामा प्रथमाध्यायः, श्लोकः-१५।

५. चरकसंहितासूत्रस्थानम्, दीर्घजीवितनामा प्रथमाध्यायः, श्लोकः-४१।

६. सुश्रुतसंहितासूत्रस्थानम्, वेदोत्पत्तिनामा प्रथमाध्यायः, श्लोकः-१४।

७. तत्रैव, पञ्चविंशाध्यायः, श्लोकाः-१५-१७।

८. चरकसंहिताशारीरस्थानम्, प्रथमाध्यायः, श्लोकाः-१३६-१४२।

९. तत्रैव, श्लोकः-१७८।